Roll No. ..........................

Total No. of Pages : 2

Total No. of Questions : 8

## पूर्वमध्यमा द्वितीयखण्ड

## विषय कोड : 614

## साहित्यम्

## चतुर्थं प्रश्नपत्रम्

समय : 3 घण्टे

पूर्णांक : 100

---

1. वस्तुनिष्ठ प्रश्नाः – 10×2=20

(क) रघुवंशमहाकाव्यस्य रचयिता कः ?

(ख) रघुवंशमहाकाव्यस्य मङ्गलश्लोकं लिखत।

(ग) रघुवंशम् महाकाव्यस्य द्वितीयसर्गे कति श्लोकाः सन्ति ?

(घ) नन्दिनी कस्याः पुत्री आसीत् ?

(ङ) राजा दिलीपः कस्य सेवां अकरोत् ?

(च) चन्द्रालोके कति मयूखाः सन्तिः ?

(छ) पञ्चमे मयूखे के विषयाः वर्णिता सन्तिः।

(ज) चन्द्रालोकस्य मङ्गलश्लोके कयोः वन्दना कृताऽस्ति।

(झ) अष्टमे मयूखे के विषयाः वर्णिता सन्ति ?

(ञ) चन्द्रालोकस्य रचयिता कः ?

2. रिक्त स्थानम् पूरयत – 5×2=10

(क) निवर्त्य राजा दयितां ........................................ सुरभिर्यशीभिः।

(ख) पुरस्कृता वर्त्मनि ........................................ प्रत्युद्गतापार्थिव धर्मपत्न्या।

(ग) सत्वं निवर्तस्व ........................................ गुरोर्भवान्दर्शिताशिष्य भक्तिः।

(घ) उपमा यत्र सादृश्य ........................................ द्वयोः।

(ङ) इवादिकपदाभावे ........................................ प्रचक्षते।



959

3. अधोलिखितेषु कयो **द्वयोः** श्लोकयोः संस्कृतेन व्याख्या लेख्या— 2×10=20

(क) लता प्रतानोद्ग्रथितैः सकेशैरधिज्यधन्वा विचार दावम्।
रक्षापदेशान्मुनिहोमधेनोर्वन्यान्विनेष्यन्निवदुष्टसत्वान्॥

(ख) वन्सोत्सुकाऽपि स्तिमिता सपर्यां प्रत्यग्रहीत्सेति ननन्दसुतौ।
भक्त्योपपन्नेषु हि तद्विधानां प्रसादचिह्नानिपुरः फलानि॥

(ग) तद्रक्ष कल्याण परम्पराणां भोक्तारमूर्जस्वलमात्मदेहम्।
महीतलस्पर्शनमात्रा भिन्नमृद्धं हि राज्यं पदमैन्द्रमाहुः॥

4. अधोलिखितेषु **द्वयोः** अलंकारयोः सोदाहरणं निरूपणं कुरुत— 2×5=10

(क) यमक

(ख) उत्प्रेक्षालंकार

(ग) व्यतिरेकालंकार

5. शुद्धाशुद्ध वाक्यानां समक्षे विचिन्त्य आम्/न लिखत— 5×2=10

(क) रघुवंश महाकाव्यम् न अस्ति।

(ख) चन्द्रालोके मयूखाः सन्ति।

(ग) चन्द्रालोके दश मयूखाः सन्ति।

(घ) चन्द्रालोकस्य मङ्गलश्लोके भगवानविष्णोः स्तुतिः अस्ति।

(ङ) प्रजानाम् अधिपः दिलीपः आसीत्।

6. करुणरसः सोदाहरणं लेखनीयः। 1×10=10

**अथवा**

को नाम रसः कतिविधश्चेति सर्वं नातिविस्तरेण लेखनीयम्।

7. महाकवि कालिदासस्य जीवनवृतंसमीक्ष्यताम्। 1×10=10

**अथवा**

रघुवंश महाकाव्यस्य महत्तं प्रदर्शयतं।

8. वैदर्भी रीतिः सोदाहरणं लेखनीया। 1×10=10

**अथवा**

लक्षणावृत्ति ग्रन्थकारदिशा सोदाहरणं निरूपणीया।



960

प्राश्निक कोड क्र. 2।।914

परीक्षा का नाम – पूर्वमध्यमा / ~~उत्तरमध्यमा~~, ~~खण्ड~~–प्रथम / द्वितीय

पृष्ठ क्र. – 1

प्रश्न पत्र/आदर्श उत्तर

विषय साहित्यम् विषय कोड 614 माध्यम संस्कृत

कुल प्रश्न 8

समय – 3 घण्टा

पूर्णांक

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| उ०→1 | | |
| क→ | कालिदासः । | |
| ख→ | वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये<br>जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥ | |
| ग→ | पञ्चसप्ततिः (75) । | |
| घ→ | कामधेनुः । | |
| ङ→ | नन्दिनी । | |
| च→ | ~~दश~~ दश मयूखाः । | |
| छ→ | अलङ्काराः पञ्चमे मयूखे वर्णिताः सन्ति । | |
| ज→ | सरस्वतीशिवयोश्च वन्दना कृताऽस्ति । | |
| झ→ | गुणीभूतव्यङ्ग्याः अष्टमे मयूखे वर्णिताः ~~अस्ति~~ सन्ति । | |
| ञ→ | ~~जयदेव~~ पीयूषवर्षी श्री जयदेवः । | |

हस्ताक्षर

961

प्राश्निक कोड क्र. 2||9|4

पृष्ठ क्र. – 2

प्रश्न पत्र/आदर्श उत्तर

परीक्षा का नाम :- पूर्वमध्यमा / उत्तरमध्यमा, खण्ड-प्रथम / द्वितीय

विषय साहित्यम् विषय कोड 614

कुल प्रश्न 1 माध्यम संस्कृत

समय – 3 घण्टा

निर्देश

पूर्णांक

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| उ०⇒2 | | |
| क⇒ | दयालुस्तां सौरभेयीं । | |
| ख⇒ | पार्थिवेन । | |
| ग⇒ | विहाय लज्जां । | |
| घ⇒ | लक्ष्मीरुल्लसति । | |
| ङ⇒ | गूढोत्प्रेक्षा । | |

हस्ताक्षर

962

प्राश्निक कोड क्र. 21.19.14



प्रश्न पत्र/आदर्श उत्तर

परीक्षा का नाम :- पूर्वमध्यमा / उत्तरमध्यमा, खण्ड-प्रथम / द्वितीय

विषय: साहित्यम् विषय कोड: 614 माध्यम: संस्कृत

कुल प्रश्न: 1

समय – 3 घण्टा पूर्णांक:

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| उत्तर-3 (क) | संदर्भ ⇒ प्रस्तुतोऽयं श्लोको महाकविकालिदासविरचितस्य रघुवंशमहाकाव्यस्य द्वितीयसर्गादुद्धृतोऽस्ति। | |
| | अन्वय ⇒ लताप्रतानोद्ग्रथितैः केशैः अधिज्यधन्वा स मुनिहोमधेनोः रक्षापदेशात् वन्यान् दुष्टसत्वान् विनेष्यन् इव दावं विचचार। | |
| | व्याख्या ⇒ लताप्रतानोद्ग्रथितैः = वल्लीविकृततन्तुबद्धैः, केशैः = कचैः, अधिज्यधन्वा = समारोपितचाप, सः = दिलीपः, मुनिहोमधेनोः = गुरुहवनसाधन नंदिन्याः, रक्षापदेशात् = संरक्षणव्याजात्, वन्यान् = आरण्यान्, दुष्टसत्वान् = हिंस्रजीवान्, विनेष्यन् = शिक्षयिष्यन्, इव = मन्ये, दावम् = अरण्यं, विचचार = परिबभ्राम॥ | |
| ख ⇒ | सन्दर्भ ⇒ प्रस्तुतोऽयं श्लोको महाकविकालिदासप्रणीतस्य रघुवंशमहाकाव्यस्य द्वितीयसर्गादवधृतोऽस्ति, | |
| | अन्वय ⇒ सा वत्सोत्सुकाऽपि स्तिमिता सती सपर्यां प्रत्यग्रहीत् इति तौ ननन्दतु हि तादृशानां भवत्या उपपन्नेषु प्रसादाचिह्नानि पुरः फलानि भवन्ति। | |
| | व्याख्या ⇒ सा = नन्दिनी, वत्सोत्सुकाऽपि = निजवत्स-दर्शनोत्कण्ठाऽपि, स्तिमिता = निष्कम्पा सती, सपर्या = पूजा, प्रत्यग्रहीत् = स्वीकृतवती, इति = | |

हस्ताक्षर

963

प्राश्निक कोड क्र. 21|314 

पृष्ठ क्र. - 4

प्रश्न पत्र/आदर्श उत्तर

परीक्षा का नाम – पूर्वमध्यमा / उत्तरमध्यमा, खण्ड–प्रथम / द्वितीय

विषय साहित्यम् विषय कोड 614 माध्यम संस्कृत

कुल प्रश्न 1

समय – 3 घण्टा

पूर्णांक

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| | अस्मात् कारणात्, तौ = दम्पती, ननन्दतुः = प्रसन्नतां जग्मतुः । हि = यतः, भक्त्या = श्रद्धया, उपपन्नेषु, युक्तेषु, तद्विधानां = नन्दिनीतुल्याम्, प्रसादचिह्नानि = प्रसन्नतालक्षणानि, पुरः फलानि = सन्निकटमनोरथपूर्णानि, 'भवन्ति' ॥ | |
| ग⇒ | प्रस्तुतोऽयं श्लोको महाकविकालिदासप्रणीतस्य रघुवंशमहाकाव्यस्य द्वितीयसर्गादवतारितोऽस्ति । | |
| | प्रसंग ⇒ महाकविरत्र दिलीपेन धेनोः कारणाज्जीवान् सम्पर्णमनुचितमिति सिंहोपदिष्टं भावं प्रतिपाद्योपसंहारस्य वचनमपि तत्प्रसंगे सविशेषं वर्णयति । | |
| | अन्वय ⇒ तत् कल्याण परम्पराणां भोक्तारम् ऊर्जस्वलम् आत्मदेहं रक्ष, हि ऋद्धं राज्यं महीतलस्पर्शनमात्राभिन्नम् ऐन्द्रं पदम् आहुः । | |
| | व्याख्या = हे राजन् ! तत् = तस्मात् कारणात्, कल्याणपरम्पराणां = सुखसाधनसमूहानाम्, भोक्तारम् = अनुभवितारम्, ऊर्जस्वलं = शक्तिसम्पन्नम्, आत्मदेहं = स्वशरीरं रक्ष = परिपोषय, हि = यतः, ऋद्धं = समृद्धं, राज्यं = राज्याधिपत्यम्, महीतलस्पर्शमात्राभिन्नं = धरातलसम्पर्कमात्रमपरम्, ऐन्द्रम् = इन्द्रसंबन्धि, पदं = स्थानाम्, आहुः = वदन्ति ॥ | |

हस्ताक्षर

964

प्राश्निक कोड क्रं. 2|9|14

पृष्ठ क्र. - 5

प्रश्न पत्र/आदर्श उत्तर

परीक्षा का नाम :- पूर्वमध्यमा / उत्तरमध्यमा, खण्ड–प्रथम / द्वितीय

विषय साहित्यम् विषय कोड 614 माध्यम संस्कृत

कुल प्रश्न 1

समय – 3 घण्टा

पूर्णांक

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| उत्तर-4= | | |
| क⇒ | यमक अंलकार | |
| | यत्र वर्णानां समूहः सर्वथा समः आवर्त्यते तत्र यमकालंकारः भवति । यथा लक्षयति ग्रन्थकारः | |
| | आवृत्त वर्णस्तवकं स्तवकन्दाङ्कुरं कवेः । | |
| | यमकं प्रथमा धुर्यमाधुर्यवचसो विदुः ॥ | |
| | धुर्यमाधुर्यवचसः प्रथमाः आवृतवर्णस्तवकं कवेः स्तवकन्दाङ्कुरं यमकं विदुः । | |
| | धुर्यमाधुर्यवचसः = माधुर्यम् = मधुरिमा, वचांसि = वाक्यानि येषां ते माधुर्यवचसः, धुर्याः = धुरीणाः च ते माधुर्यवचसश्च धुर्यमाधुर्यवचसः प्रथमाः = आद्या, श्रेष्ठाः आलङ्कारिकाः । आवृत्तवर्णस्तवकम् = पुनरुक्तशब्दसमूहम् । कवेः = काव्यरचयितुः स्तवकन्दाङ्कुरम् = स्तुतिबीजाङ्कुरप्रकाशकम्, यमकम् = एतदाख्यम् अलकारम्, विदुः कथयन्ति ये खलु मधुरभाषिणः विद्वांसः आचार्याः ते श्रेष्ठाः विपश्चितः कवेः प्रशंसयितारमनेकेषां वर्णानाम् आवृत्तिसन्दोहम् अलंकारं वदन्ति ख्यापयन्ति, समस्यावृत्तेरिदं यमकम् । र-ल श-ष, न-ण, ड - ल, विसर्ग- विसर्ग बिन्दुकाबिन्दुकादीनां सत्यापि साम्यभेदे यमकादावभेदकल्पनं भवति यथा– | |
| | यमकादौ भवेदैक्यं डलयोरलयोर्बवोः । | |
| | शषयोर्नणयोश्चान्ते सविसर्गाविसर्गयोः ॥ | |
| | सबिन्दुकाबिन्दुकयोः स्यादभेदकल्पनम् ॥ | |

हस्ताक्षर

965

प्राश्निक कोड क्र. 211914

पृष्ठ क्र.- 6

प्रश्न पत्र/आदर्श उत्तर

परीक्षा का नाम :- पूर्वमध्यमा / उत्तरमध्यमा, खण्ड-प्रथम / द्वितीय

विषय साहित्यम् विषय कोड 614 माध्यम संस्कृत

कुल प्रश्न 1

समय - 3 घण्टा

पूर्णांक

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| उत्तर-4 | | |
| ख- | उत्प्रेक्षालंकार | |
| | उत्प्रेक्षोन्नीयते यत्र हेत्वादिर्निह्नुतिं विना, | |
| | त्वन्मुखश्रीकृते नूनं पद्मैर्वैरायते शशी ॥ | |
| | यत्र निह्नुतिं विना हेत्वादिः उन्नीयते तत्र उत्प्रेक्षालंकारः भवति, उदाहरति - शशी त्वन्मुखश्रीकृते नूनं पद्मैः वैरायते। यत्र = यस्मिन् स्थले, निह्नुतिम् = निषेधं विनैव, हेत्वादिः = कारण-फल स्वरूपादिः, उन्नीयते = उत्कटकोटिकसंशयविषयी क्रियते तत्र उत् = उर्ध्वगामिनी, प्रेक्षा = दृष्टिः भवति, यथा = कश्चिज्जन कमपि पदार्थं सम्भावयति तदा तस्य दृष्टिः आकाशादिमेव तिष्ठतीति व्युत्पत्तिरस्या अन्वर्था, अतएव उत्प्रेक्षालंकारः भवति, उदाहरति = शशी = चन्द्रः, त्वन्मुखस्य = त्वदीयाननस्य श्रीकृते = शोभाकृते, नूनम् = हि, पद्मैः = कमलैः, वैरायते = वैरमाचरतीति, सा च हेतु-फल-स्वरूप भेदात् त्रिविधा, अत्र चन्द्रपद्मयोः विरोधः स्वाभाविकः, न मुखकान्तिलिप्सा हेतुक तथापि तद्धेतुकत्वेन संभावनात् हेतूत्प्रेक्षा, अनयोः विरोधे रिफलस्यापि कान्त वदनकान्तिप्राप्तेः फलत्वेनोत्प्रेक्षणात् फलोत्प्रेक्षा एवं वस्तुतो वैरकर्तयापि शशिनि पद्मसंकोचन-निमित्तेन वैरकृततादात्म्योत्प्रेक्षणात् स्वरूपोत्प्रेक्षा ॥ | |
| | अस्य उत्प्रेक्षावाचकाः शब्दा एते सन्ति - | |
| | मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः। | |
| | उत्प्रेक्षा व्यज्यते शब्दैरिव शब्दतोऽपीदृशः ॥ | |

हस्ताक्षर

966

प्राश्निक कोड क्र. 21/914

पृष्ठ क्र.- 7

प्रश्न पत्र/आदर्श उत्तर

परीक्षा का नाम :- पूर्वमध्यमा / उत्तरमध्यमा, खण्ड-प्रथम / द्वितीय

विषय साहित्यम् विषय कोड 614 माध्यम संस्कृत

कुल प्रश्न 2

समय - 3 घण्टा

पूर्णांक

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| उत्तर-5 | | |
| ग ⇒ | व्यतिरेकालंकार<br>यत्र उपमानादापेक्षया उपमेये आधिक्यस्य उत वा न्यूनताया: वर्णनं क्रियते तत्र व्यतिरेकालंकार: भवति, यथा श्लोकमाह पीयूषवर्षी श्री जयदेव:-<br>व्यतिरेको विशेषश्चेदुपमानोपमेययो:<br>शैला इवोन्नता: सन्त: किंतु प्रकृतिकोमला:॥<br>चेत् उपमानोपमेययो: विशेष: व्यतिरेक: भवति, उदाहरति- सन्त: शैला इव उन्नता: किन्तु प्रकृतिकोमला: भवन्ति।<br>चेत् = यदि, उपमानोपमेययो: विशेष: = वैलक्षण्यम् स्यात्, तदा व्यतिरेक: = व्यतिरेकालंकार: भवति, उदाहरति- सन्त: = सत्पुरुषा: शैला इव = पर्वता इव, उन्नता: = औन्नत्योपेता:। किन्तु प्रकृतिकोमला: = स्वभाववत्सला, मृदुलान्त:करणा: साधव: शैला इव उन्नता: भवन्ति किन्तु पाषाणवत् कठोरा: न भवन्ति। अत्र हि उन्नतत्वेन सज्जनपर्वतयो: साम्येऽपि कोमलत्वेनोपमेये सज्जनानामाधिक्यप्रतिपादनम् अत एव व्यतिरेकालंकार सिद्धयति॥ | |
| उत्तर-5 | | |
| क ⇒ | न। | |
| ख ⇒ | आम्। | |
| ग ⇒ | आम्। | |
| घ ⇒ | न। | |
| ङ ⇒ | आम्। | |

हस्ताक्षर

967

प्राश्निक कोड क्रं. 21/614

पृष्ठ क्र. - 8

प्रश्न पत्र/आदर्श उत्तर

परीक्षा का नाम - पूर्वमध्यमा / उत्तरमध्यमा, खण्ड-प्रथम / द्वितीय

विषय साहित्यम् ........ विषय कोड 614 ........ माध्यम संस्कृत

कुल प्रश्न 2

समय - 3 घण्टा

पूर्णांक ........

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| उत्तर=6 | करुणरस: | |
| | अस्य रसस्य स्थायीभाव: शोकः अस्ति, यः अत्यन्ताभीष्ट-वस्तुनः विप्रयोगादुत्पन्नः भवति, अत्र नायक नायिक चालम्बन विभाव: अभीष्टस्य पुत्रादेर्वियोग: दूरगमनरूपो मरणं चोद्दीपन-विभाव: अश्रुपातादिरनुभाव:, ग्लान्यादिव्यभिचारिभाव: । | |
| | करुणरसं लक्षयति । | |
| | अभीष्टविप्रयोगाश्रुपातग्लान्यादिभि: क्रमात् । | |
| | विभावाद्यैर्युत: शोकस्थायी स्यात् करुणो रस: ॥ | |
| | क्रमात् अभीष्टविप्रयोगाश्रुपातग्लान्यादिभि: विभावाद्यै: युत: शोकस्थायी रस: करुण: स्यात् । | |
| | क्रमात् = क्रमश:, अभीष्टविप्रयोगाश्रुपातग्लान्यादिभि: = अभीप्सितवियोगनयनजलस्रावग्लान्यादिभि:, विभावाद्यै: = विभावानुभावव्यभिचारिभि: । युत: = सहित:, समन्वित । शोकस्थायी = स्थायीभावरूपेण शोक: विद्यमान: । रस: करुण: = करुणरस: भवेत् । उदाहरण यथा– | |
| | अथ सा पुनरेव विह्वला वसुधालिंगनधूसरस्तनी । | |
| | विललाप विकीर्णमूर्धजा समदु:खामिव कुर्वतीस्थलीम् ॥ | |
| | अथवा | |
| उत्तर=6 | नाट्याचार्यो भरत: नाट्यशास्त्रे लिखति यत् विभावानुभावव्यभिचारिसंयोगात् रसनिष्पत्ति भवति । रस्यते आस्वाद्यते असौ इति रस: रसो वै स: रस हि स्वाद्यं लब्ध्वा आनन्दी भवति इति आनन्दार्थेऽपि दृश्यते । | |
| | रससामान्यलक्षणं लक्षयन्नाह ग्रन्थकार:= | |

हस्ताक्षर ........

968

प्राश्निक कोड क्र. 21914

पृष्ठ क्र. – 9

प्रश्न पत्र/आदर्श उत्तर

परीक्षा का नाम :- पूर्वमध्यमा / उत्तरमध्यमा, खण्ड-प्रथम / द्वितीय

विषय साहित्यम् विषय कोड 614 माध्यम संस्कृत

कुल प्रश्न 1

समय – 3 घण्टा

पूर्णांक

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| उत्तर-6 | गलद्वेधान्तराद् भेदं हृदयेष्वजडात्मनाम् । | |
| | मिलन्मलयजालेप इवाह्लादं विकासयन् ॥ | |
| | काव्ये नाट्ये च कार्ये च विभावाद्यैर्विभावित । | |
| | आस्वाद्यमानैकतनुः स्थायिभावो रसः स्मृतः ॥ | |
| | मिलन्मलयजालेप इव अजडात्मनाम् हृदयेषु गलद्वेधान्तरोद् भेदम् आह्लादं विकासयन् काव्ये च नाट्ये कार्ये च विभावाद्यैः विभक्ति आस्वाद्यमानैकतनुः स्थायिभावः रसः स्मृतः | |
| | मिलन्मलयजालेप = मलयप्रदेशोद्भवचन्दनसंवलितलेपः इव = यथा, अजडात्मनाम् = सुहृदयविपश्चिदाम्, हृदयेषु = हृत्सु, गलद्वेधान्तरोद्भेदम् = रसातिरिक्तान्यवेद्यपदार्थज्ञानशून्यम्, आह्लादम् = आनन्दम्, हर्षोल्लासम्, विकासयन् = प्रस्फुटयन्, काव्ये नाट्ये च = श्रव्ये काव्ये दृश्ये नाटकादौ च, कार्ये = नाटकावलोकनकृत्ये च, विभावाद्यैः = विभावानुभावव्यभिचारिभिः भावैः, विभक्ति = रूपान्तरे परिणतः, आस्वाद्यमानैकतनु = आस्वाद्यमानशरीरः सन्, स्थायीभावः = रत्यादिभावः, रसः = रस इति नाम्ना स्मृतः कथ्यते, सामाजिकनिष्ठ रत्यादिस्थायीभावः रस्यते आस्वाद्यते इति रसः, यथोक्तम् - रसते स्वादनायत्वात् रस्यन्ते इति ते रसाः । दशरूपककारः धनञ्जयः अप्याह - | |
| | विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः । | |
| | आनीयमानः स्वाद्यत्वं स्थायीभावः रसः स्मृतः ॥ | |
| | नवरसाः भवन्ति - श्रृंगार-हास्य-करुण-रौद्र-वीर-भयानक-वीभत्स-अद्भुत-शान्तश्च, यथा निरूपितम् | |

हस्ताक्षर

प्राश्निक कोड क्रं. 2/1914

पृष्ठ क्र.- 10

प्रश्न पत्र/आदर्श उत्तर

परीक्षा का नाम – पूर्वमध्यमा / उत्तरमध्यमा, खण्ड–प्रथम / द्वितीय

विषय साहित्यम् ........ विषय कोड 614 ........ माध्यम संस्कृत

कुल प्रश्न 2

समय – 3 घण्टा

पूर्णांक ........

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| उ० ३६ | श्रृंगार-हास्य-करुण-रौद्र-वीर-भयानकाः ।<br>बीभत्साद्भुतशान्ताश्च रसाः पूर्वैरुदाहृताः ॥<br>एषां नवरसानां क्रमशः रति-हास-शोक-क्रोध-उत्साह-भय-जुगुप्सा-विस्मय-शमश्च स्थायीभावाः भवन्ति, यथा निरूपितम्<br>रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा<br>जुगुप्सा-विस्मय-शमाः स्थायिभावाः नव क्रमात् ॥ | |
| उ० ३७ | भारतवर्षस्य रत्नगर्भेयं वसुन्धरा धन्याऽस्ति यत्र विश्व कविश्रेष्ठ कालिदासः जन्म लेभे, अयं न केवलं संस्कृत साहित्ये अपितु विश्ववाङ्मयेऽपि प्रतिनिधिभूतो महाकविरस्ति, के न जनाः तत्कृतकाव्यामृतरसास्वादेन प्लाविताः सन्ति, तस्याऽलंकारिकैः प्रशंसितानि बहु सुभाषितानि वाक्यानि सन्ति, दिङ्मात्रमेवात्रोदाह्रियन्ते – | |
| 1. | 'उपमा कालिदासस्येति' | |
| 2. | 'भासो हासः कविकुलगुरुः कालिदासो विलासः' । | |
| 3. | 'निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु ।<br>प्रीतिर्मधुरसान्द्रासु मञ्जरीष्विव जायते' ॥ | |
| | जीवनवृत्तम् – भारतदेशस्यालंकारभूतोऽयं महाकविः कुत्राऽऽसीत् ? का च जन्मभूमिः ? कौ च तस्य पितरावितिप्रश्नानामद्यापि नावाप्यते किञ्चित् प्रमाणम् यत्किञ्चिद् वक्तुं शक्यते तदप्यनुमानप्रमाणाधीनमेव, जनश्रुत्या जीवनारम्भे महाकविर्मेघचारको महामूर्खश्चासीत्, कपटरीत्या विद्योत्तमया राजकन्यया | |

हस्ताक्षर

950

प्राश्निक कोड क्र. 21.1914 | पृष्ठ क्र.– 11
प्रश्न पत्र/आदर्श उत्तर

परीक्षा का नाम :- पूर्वमध्यमा / उत्तरमध्यमा, खण्ड-प्रथम / द्वितीय

विषय साहित्यम् ............ विषय कोड 614 ............ माध्यम संस्कृत

कुल प्रश्न 1

समय – 3 घण्टा | पूर्णांक..........

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| उ०→ | सह परिणयसम्बन्धानन्तरं तया तिरस्कृतः लज्जितश्च स कालिशम्भ्युपासनया परं वैदुष्यमवाप, गृहञ्चागत्य तया 'अस्ति कश्चित् वाग्विशेषः' इति पृष्टा सः अस्ति-पदेन कुमारसम्भवस्य, कश्चित्पदेन मेघदूतस्य, वाक्पदेन रघुवंशस्य च प्रारम्भस्यैकैकं श्लोकमाश्रित्य काव्यत्रयं विरचितवान्, इदं वृत्तमपि वयं स्वात्मसन्तोषायमेव स्वीकुर्मः ॥ | |
| | देशकालविचारः— विविधमतान्तरेषु महाकवेः स्थितिसमयं खीष्टाब्दपूर्वप्रथमशतकस्य विक्रमादित्यस्य नवरत्नसदस्येषु सयुक्तिप्रामाणिकं मन्यते, तस्य जन्मविषयेऽपि विविधमताः प्रचलिताः सन्ति किन्तु उज्जयिनीवर्णनदृष्ट्याऽवन्तीप्रान्तभूमिरेवाधिका प्रामाणिका समर्थितेति । | |
| | कृतयः— महाकवेः निम्नलिखित सप्तकृतयः सम्प्रत्युपलब्धाः सन्ति— | |
| | 1. रघुवंशमहाकाव्यम् | |
| | 2. कुमारसम्भवमहाकाव्यम् | |
| | 3. मेघदूतम् | |
| | 4. ऋतुसंहार | |
| | 5. मालविकाग्निमित्रम् | |
| | 6. विक्रमोर्वशीयम् | |
| | 7. अभिज्ञानशाकुन्तलम् | |

हस्ताक्षर..........

971

प्राश्निक कोड क्रं. 2/1314

पृष्ठ क्र. – 12

प्रश्न पत्र/आदर्श उत्तर

परीक्षा का नाम – पूर्वमध्यमा / उत्तरमध्यमा, खण्ड–प्रथम / द्वितीय

विषय साहित्यम् ........ विषय कोड 6146 ........ माध्यम संस्कृत

कुल प्रश्न 1

समय – 3 घण्टा

पूर्णांक........

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| | अथवा | |
| उ०-7 | महाकविकालिदासकृतं रघुवंशमहाकाव्यं रघुवंशीयनृपतीनां सर्वोत्तम लोकजीवनादर्शं प्रकाशयति। अत्र भगवतः श्रीरामस्यैवेतिवृत्तं प्रधानमस्ति, अस्य यथाक्रमं संक्षिप्तं महत्त्वमत्र नूनमस्माभिः ध्येयमिति<br>नाम्नैव ज्ञायते यत् यस्मिन् वंशे रघुः राजा आसीत् तत्सम्बन्धिनमिदं महाकाव्यं कविकालिदासेन प्रणीतमस्ति। प्रथमसर्गारम्भे 'रघूणामन्वयं वक्ष्ये' इत्युक्त्वा कविः स्वयमेव नामकरणस्य व्याख्या प्रस्तौति, अतोऽस्य व्युत्पत्तिलभ्योऽर्थ एव समीचीनं प्रतिभाति, रघोः रघूणां वा वंशः रघुवंशः। रघुवंशस्य वृत्तमस्तीति, यस्मिन् काव्ये तत् रघुवंशमिति।<br>यद्यपि रघुवंशमहाकाव्यस्य कथावस्तु वाल्मीकिरामायण महाभारत पद्मपुराणादि विविध धर्मशास्त्रेषु तदनुरूपं प्रतिपादितमस्ति परन्तु अस्याधारमूलं वाल्मीकिरामायणमेव विद्यते, अनयोर्वंशानुक्रमादिवर्णनेऽपि महदन्तरं लक्ष्यते यथा वाल्मीकिरामायणे दिलीपादारभ्य रामपर्यन्तमष्टादश नृपतीनामुल्लेखमस्ति किन्तु रघुवंशे दिलीप-रघु-अज-दशरथ-रामादिक्रमेण पञ्चवंशपरम्परैव प्राप्यते<br>19 सर्गेषु रघुवंशमहाकाव्यस्य वर्णितराजवृत्तनामावली यथाक्रममेवमस्ति। — 1. दिलीपः, 2. रघुः, 3. अजः, 4. दशरथः, 5. रामः, 6. कुशः, 7. अतिथिः, 8. निषधः, 9. नलः, 10. नभः, 11. पुण्डरीकः, 12. क्षेमधन्वा, 13. देवानीकः, 14. अहीनगुः, 15. पारियात्रः, 16. शीलः, 17. उन्नाभः, 18. वज्रनाभः, 19. शंखणः, 20. व्युषिताश्वः, 21. विश्वसहः, 22. हिरण्यनाभः, | |

हस्ताक्षर........

942

प्राश्निक कोड क्र. 21/314

पृष्ठ क्र. – 13

प्रश्न पत्र/आदर्श उत्तर

परीक्षा का नाम – पूर्वमध्यमा / उत्तरमध्यमा, खण्ड–प्रथम / द्वितीय

विषय साहित्यम् विषय कोड 614 माध्यम संस्कृत

कुल प्रश्न 2

समय – 3 घण्टा पूर्णांक

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| उ०=7 | 23. कौशल्यः, 24. ब्रह्मनिष्ठ, 25. पुत्रपुष्पः, 26. ध्रुवःसन्धिः, 27. सुदर्शनः, 28. अग्निवर्णः, एतेषु षोडश सर्गपर्यन्तं रामस्यैव प्रधानतया वृत्तं वर्णितमस्ति अन्येषाञ्च नृपतीनां दिङ्मात्रमेव वृत्तमुपलभ्यते ॥ काव्येऽस्मिन् शृंगाररस्यैव प्राधान्यमस्ति, अन्तिमे सर्गेऽग्निवर्णस्य विलासमयजीवनवृत्तं करुणरसमभिव्यञ्जयति। अन्यरसा अंगरूपेण परिपुष्टा समृद्धाश्च सन्ति, वैदर्भीरीतिः सर्वोत्कर्षं स्वरूपं प्रदर्शयति, प्रसादगुणस्य सर्वत्र प्रभुत्वं विद्यते, ओजमाधुर्यगुणानाञ्च सुसमन्वयोऽस्ति, अत्र चराचरजगदेव प्रतिपादितं जातम्, उपमाद्यलङ्काराणामद्वितीयमेव सौन्दर्यं दृश्यते, छन्दांसि च यथाक्रमं प्रयुक्तानि सन्ति, यथा- अनुष्टुप्, प्रहर्षिणीः, उपजातिः, मालिनीः, वंशस्थ, हरिणी, वसन्ततिलका, पुष्पिताग्रा, वैतालीयः, तोटक, मन्दाक्रान्ता, द्रुतविलम्बित, शालिनी, औपच्छन्दसिकं रथोद्धता, स्वागता, मत्तमयूर, नाराचेति दिक् ॥ | |
| उ०⇒8⇒ | सर्वथा समासाभावेऽल्पसमासे वा वैदर्भी रीतिःभवति। यथोक्तमस्ति–<br>माधुर्यव्यञ्जकैर्वर्णैः रचना ललितात्मिका।<br>आवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते ॥<br>वैदर्भीरीतेः उदाहरणं यथा–<br>निविशते यदि शूकशिखा पदे सृजति सा कियतीमिव न व्यथाम्।<br>मृदुतनोर्वितनोतु कथं नु तामवनिभृत्तु निविश्य हृदि स्थितः ॥ | |

हस्ताक्षर

प्राश्निक कोड क्र. 2/1914

पृष्ठ क्र. - 14

प्रश्न पत्र/आदर्श उत्तर

परीक्षा का नाम :- पूर्वमध्यमा / उत्तरमध्यमा, खण्ड-प्रथम / द्वितीय

विषय: साहित्यम् विषय कोड 614 माध्यम संस्कृत

कुल प्रश्न 1

समय - 3 घण्टा

पूर्णांक..........

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| | अथवा | |
| उ०-8 | यत्र वक्तुः अभिधेयोऽर्थः अभीष्टः न भवेत्, मुख्यार्थस्यान्वयः बाधितः स्यात् तत्र मुख्यसंबद्धमर्थमपरं प्रतिपादयित्री लक्षणावृत्तिः भवति, लक्षणा इयं द्विधा मता पूर्वा (निरूढा लक्षणा) अर्वाचीना प्रयोजनलक्षणा चेति, तत्र निरूढालक्षणायाः उदाहरणमस्ति - कलिंग साहसिकः। अर्वाचीना-प्रयोजनलक्षणायाः उदाहरणमस्ति - गंगायां घोषः। | |
| | यथा लक्षयति ग्रन्थकार — | |
| | मुख्यार्थस्याविवक्षायां पूर्वाऽर्वाची च रूढितः। | |
| | प्रयोजनाच्च सम्बद्धं वदन्ती लक्षणा मता। | |
| | मुख्यार्थस्य अविवक्षायां संबद्धम् अर्थं वदन्ती वाक् लक्षणा मता, सैव पुनः रूढितः पूर्वा प्रयोजनाच्च अर्वाची मता। | |
| | मुख्यार्थस्य = अभिधेयार्थस्य, अविवक्षायाम् = तात्पर्यानुपपत्तौ, संबद्धम् = मुख्यार्थसम्बद्धम् अर्थम्, वदन्ती = प्रतिपादयित्री। वाक् = वाणी, लक्षणा मता = लक्षणावृत्तिः स्वीकृता, सैव = लक्षणा वृत्तिरेव, पुनः = भूयः, रूढितः = लोकप्रसिद्धव्यवहारात्। पूर्वा = निरूढालक्षणा, प्रयोजनाच्च = वक्तुः प्रयोजनवशात् च अर्वाचीना प्रयोजनवती लक्षणा, मता = अभीष्टा। | |
| | तत्र निरूढायाः उदाहरणम् - कलिंग साहसिकः उदाहरणेऽस्मिन् वक्तुरयमर्थः अभीष्टोऽस्ति, यत् कलिंग देशीयाः पुरुषाः साहसिकाः सन्ति, अत्र केवलं मुख्यार्थः कलिंग देशः अभीष्टः नास्ति, ~~अतस्वात्~~ अतस्तत्र लक्षणावृत्त्या | |

हस्ताक्षर..........

914

प्राश्निक कोड क्र. 2/914

पृष्ठ क्र. – 15

प्रश्न पत्र/आदर्श उत्तर

परीक्षा का नाम – पूर्वमध्यमा / उत्तरमध्यमा, खण्ड–प्रथम / द्वितीय

विषय साहित्यम् विषय कोड 614 माध्यम संस्कृत

कुल प्रश्न 8

समय – 3 घण्टे

पूर्णांक

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| उ०-8 | मुख्यार्थकलिंगदेशसम्बद्धानां पुरुषाणां बोधः जायते येन लक्षणावृत्तिः अत्र सिद्ध्यति ~~सन्निवेशादेवाय~~ रूढिवशादेवाय प्रयोगः क्रियते अतएव निरूढा लक्षणा कथ्यते । अपरमुदाहरणम् गंगायां घोष अत्र मुख्यार्थोऽस्ति गंगाजलप्रवाहे घोषः किन्त्वत्र गंगाप्रवाहे घोषनिर्मितिरेव नैव भवितुं शक्नोति अतएवात्र मुख्यार्थो बाधितः भवति । अतः मुख्यार्थसम्बद्धगंगायां तटरूपोऽपरोऽर्थः लक्षणावृत्त्या उपस्थितो भवति । अत्यः घोष निर्जने शमप्रधाने पवित्रे च स्थाने वर्तते, वक्तुः अभीष्टोऽस्ति अयमोवार्थः, वक्ता इदमेव प्रयोजनम् अभिलषति । अतएव इयम् अर्वाचीना प्रयोजनवती लक्षणा सञ्जाता ॥ | |

हस्ताक्षर

975